# ११. क्रियापदस्य सहचराः । (तृतीयः घटकः)

पठामि, लिखामि, यच्छामि, पश्यामि एतानि पदानि क्रियां दर्शयन्ति । अतः तानि क्रियापदानि । वाक्ये क्रियापदस्य नैके सहचराः । जानीमः तान् सर्वान् ।



अत्र का क्रिया ?–लेखनम् ।
कः लिखति ।
गौरवः लिखति । गौरवः इति कर्ता ।
गौरवः किं लिखति ?
गौरवः निबन्धं लिखति । निबन्धम् इति कर्म ।
गौरवः केन निबन्धं लिखति ?
गौरवः लेखन्या निबन्धं लिखति । लेखनी इति साधनं करणं वा ।



सानिका किं यच्छति ?
सानिका लेखनपुस्तिकां यच्छति । लेखनपुस्तिकाम् इति कर्म ।
सानिका कस्मै लेखनपुस्तिकां यच्छति ?
सानिका अध्यापकाय लेखनपुस्तिकां यच्छति ।
अध्यापकाय इति सम्प्रदानम् ।



सानिका गौरवः च किं पश्यतः ?
सानिका गौरवः च आम्रफलं पश्यतः ।
आम्रफलम् इति ______ ।
आम्रफलं कस्मात् पतति ?
आम्रफलं वृक्षात् पतति । वृक्षात् इति अपादानम् ।
आम्रफलं कुत्र पतति ?
आम्रफलम् अङ्गणे पतति ।
अङ्गणे इति अधिकरणम् ।

> कर्ता–कर्म–करणं–सम्प्रदानम्–अपादानम्–अधिकरणम् च इत्येते सर्वे वाक्ये क्रियापदस्य सहचराः ।
> ते सर्वे मिलित्वा क्रियां कुर्वन्ति । अतः तानि कारकाणि ।

| कारकम् | विभक्तिः | उदाहरणम् |
| --- | --- | --- |
| कर्ता | प्रथमा | **रमा** गीतं गायति । |
| कर्म | द्वितीया | मधुरा **जलं** पिबति । |
| करणम् | तृतीया | अहं **सुधाखण्डेन** लिखामि । |
| सम्प्रदानम् | चतुर्थी | माता **बालकाय** क्रीडनकं यच्छति । |
| अपादानम् | पञ्चमी | नृपः **रथात्** अवतरति । |
| ----- | षष्ठी(सम्बन्धः) | **दशरथस्य** पुत्रः रामः । |
| अधिकरणम् | सप्तमी | धेनुः **गोष्ठे** तिष्ठति । |

## भाषाभ्यासः

**१. अधोरेखितानां शब्दानां कारकं लिखत माध्यमभाषया अनुवादं कुरुत च ।**

१) **आदित्यः** गीतं गायति ।
२) बालकाः **उद्याने** क्रीडन्ति ।
३) **अहं** देवं प्रणमामि ।
४) त्वं **छुरिकया** फलं कर्तयसि ।
५) उल्का **अवकाशात्** पतति ।
६) मुख्याध्यापकः **छात्रेभ्यः** **पारितोषिकाणि** यच्छति ।
७) वयं **चित्रपटं** पश्यामः ।
८) **पितामहः** **प्रभाते** वृत्तपत्रं पठति ।
९) **गिर्यारोहकः** **शिखरात्** **यष्टिकाभ्याम्** अवतरति ।

**२. योग्यविभक्तिरूपं योजयत ।**


१. युवकः (वित्तकोष) ______ धनम् आनयति ।
४. पितामहः (देव) ______ पूजयति ।
२. आपणिकः (तुला) ______ धान्यं तोलयति ।
५. (प्रदर्शिनी) ______ चित्राणि सन्ति ।
३. भ्राता (भगिनी) ______ शाटिकां यच्छति ।

**३. योग्यं पर्यायं चिनुत ।**

१. छात्रः श्लोकः/श्लोकं स्मरति ।
५. आकाशे/आकाशात् तारकाः पतन्ति ।
२. रक्षकः क्रोधेन/क्रोधाय चोरं ताडयति ।
६. मन्त्रिमहोदयः कार्यक्रमस्य/कार्यक्रमम् उद्घाटयति ।
३. शिक्षकः छात्रेभ्यः/छात्रैः पुस्तकानि यच्छति ।
४. वाटिकायां/वाटिकायाः जलधारायन्त्रम् अस्ति ।

I7LXJ7

**४. उचितविभक्तिप्रयोगेण वाक्यं रचयत ।**




**५. विभिन्न-कारकाणाम् उपयोगं कृत्वा यच्छति, ग्रथति, क्षिपति, पठति इत्यादीनां क्रियापदानां साहाय्येन दीर्घाणि वाक्यानि रचयत ।**